निराह राजान् विषयकषायवशगा जीवाः कृगतिनरपतेन श्रूयते नानुभूयते तच्चिंतयित्वा दुर्ध्यानेन न
रकनिगोदमहादुःखसमुद्रे पातयति तत्रस्वरूपेण तु किमपि कृतं नास्ति परमति विषयकषायगर्भितनिरर्थ
कं विकल्पं कारयित्वा परंपरया ऽनंतकालं यावत् वधबंधनताडनताडनछेदनभेदनादिबहुलदुःखमा ६२
प्नोति यद्व कुमपि न समर्थ ज्ञानिनः राजाहस्वामिन् भवतायदुक्तं नरकनिगोदादिस्वरूपं तत्कृपां कृत्वा ऽ

स्मिन्नासने स्थित्वाप्युपदिश्यतां स्वामिनां मार्गे सकलभवनेयुक्तं परं सम्यक्ज्ञानां स्कलेनगुणेन लवलेश अतो मम उपगा
रं कर्तुं समर्थ यूयं तेन प्रार्थनां करोमि ततो मुनिरपि ज्ञात्वा तत्र स्थित्वा आगमप्रसिद्धानरकनिगोदविपाका
न् सद्भूतकारान् उपदेशद्वारेण दर्शिता राजा तत्त्श्रुत्वा चमत्कृतो भीतश्च मुनिं नत्वा प्राह यदि अनर्थबलो संसा
रः तदा मादृशो नां प्रतिक्षणं कुकर्मकारिणां का गतिर्भविष्यति साधुराह राजन् अद्यापि किं चित् गतं नास्ति
यदि जागरूको भूत्वा धर्मं आराधयति स्तोकेनैव कालेन दृढप्रहार कालकुमार चिलातीपुत्र चुल्लनादीनां
मतीव कुकर्मकारीणां बहुमि सकलकर्मक्षयं कृत्वा मुक्तिसुखमाप्नोति यत्तुलायां त्रिजगति न कोप्यायाति
अतो सावधानो भूत्वा यथाशक्त्या धर्ममाचरतु राजाह स्वामिन् यन्निमित्तवार्ता यामश्रुतपूर्वा स्फुरवामि
काप्राप्ता तन्मुनिनोक्तं भवतः अधुना तदयां कृत्वा तदृत्तांतो साधुराह राजन् विचित्रा कर्मणां गतिः क
र्मोदियोत्थिमहाबलवत्तरो तस्यायोकस्यापि बलं न प्रसरति यतो येन कुले जातास्तत्कुकर्म प्रवृत्तिं म
नसापि न इच्छंति कर्तुं तु दूरे कुकर्मवार्तयापि दुनोति इदृशानां मपि प्रबलविषयोदय बलेन पूर्वनिबद्धक
र्मणामुदयाद धीनेन तस्यापि मतिविपर्यासो ऽनिर्वचनीयो भवति तत्र श्रुत्वा ऽस्मे जीवा सत्त्वं न मन्यते प्रस्तुतो सा
धकस्योपालं कृत्वे कर्मोदये रिद्रशानि कुकर्मकरणाय मति प्रेरयति ततो कस्यापि जंतो पूर्वनिबद्धक
र्मोदयबलेन कुकर्मप्रवृत्ति कृत्वा परं पुण्यबलेन केपापि न ज्ञातास्तत गुरुचरणप्रसादेन स्मा लिज्ञाता परंत

तस्य जीवो स्वकृतकर्मवशात् स्थित्वा मनसा ह्यते तत्कृते वसंबंधेन श्रुतं श्रुत्वागतस्नेहो भवति इत्थं वा परि
वदंति अतिनिकटसंबंधे ताडनादिकमपि करोति तदुःखेन पीडितो मजीवो दृष्टा हर्षी च भवति तन्निमि
त्तं बहुतरकर्म उपचिनोति किं बहुना स्वल्पसंबंधोपि न भवेत् अतो कथनादकथनमेव श्रेयः इति श्रुत्वा चिर
तं मुनिं धनंदाः प्राह भगवन् युष्मादीयोपदेशेन कर्माधीनं जगत् सर्वं मुक्तिं विना कृतकर्मणां मोक्षो नास्ति
इति श्रद्धा स्थिरतरा चित्ते संनिविष्टा पूर्वकृतकर्मोदयबलेन जीवाः कर्तव्यमकर्तव्यं च करोति साधुकेन तत्र
विस्मयो न कर्तव्य प्रत्युताकर्तव्यस्य पश्चात्तापो कर्तव्य यथा श्रेयः हृदि निर्याति भवदुपदेशेनापकारेणेति ज्ञातं
अतो मत्स्वेन तत्कर्मोदयजनितविपाकं श्रोतव्यं साधुः प्राह किमपि युष्मत्स्वकं न भविष्यति तदा तद्भवा ऽप्री
ति उत्पादोत्तुनं न भविष्यति इति भवति चेत्तदा तु कथयामि नान्यथा राज्ञिः चाह भगवन् मत्स्वेन तदुच्यतां अस्मा
कं तु तत्स्वरूपज्ञानं विलम्बितदुःकृतं स्फुटा भवतः तत्पश्चात्ते तदुःकृतनाशनोपायो ऽपि भविष्यति राजा प्राह
स्वामिन् भवदुपदेशेन अमुकेन दुःखं स्फोटेवादत्तमिति त्वमतः लिचिरकाल परस्थिते तापि गता यजीवो दुःक
तं करोति तत्कर्मोदयाज्ञानचमात्र्यकर्मोदयाज्ञानयोः गौणमुख्यत्वेन यथावसरं प्रवर्तयति तस्मात्तरा
गद्वेषहद्धि भवदुःप्रकारान्तरं भविष्यति अतः स्फुटेनोच्यतां तदा साधुः प्राह हे स्फनंदे पूर्वैदि वाल्यत्वे मदूदा ६३
वासोपरि सखीसह स्थितया त्वया कस्यापि स्वगृहे हरतो सो काश्चित् रूपयौवनविनयादिगुणान्विता या सत्री

किमप्यलिका स्वात्मानं दत्वा प्रकं त्वया लाऽस्माननं दृष्ट्वा तत्पुरुषेद्देष्यो स्पन्नो ति मसं ममसत्यं वा इति मुनेरुक्तं श्रुत्वा
चमत्कृता स्फनंदा प्राह स्वामिन् सत्यं भवदुक्तं मम सत्यं न भवत्येव तादृशेन तनुना पाणिग्रहणाय करणो प्रतिज्ञा कर्तुं न
ग्यासखिलिः । वारिता स्थिता पुनः कालांतरे यौवनवयसि प्राप्ते पुनः । तत्रैव वासोपरि स्थितया त्वया । कस्मिन् वितम
हे स्यावासान्तरे दंपत्योः । विलसनं दृष्ट्वा । तवापि तीव्रकामोदयो जातः । सख्या त्रिरखां दत्वा । वासोपरितन स्तम्भा
उत्तार्य गवाक्षे स्थापिता । तदवसरे अमुकमहेभ्यापुत्रो ऽतिरूपयौवनवानुज्ज्वलवस्त्राभरणभूषितो चतुष्पथा तो ह
ट्टिकहट्टे स्थितो दृष्टः । तव तदुपरि कामरागेन व्यामोहो जातः । सखिहस्तेन पत्रीप्रमुखप्रयोगेन पूर्वोक्त व्यतिकरे
णायुवयोः । गाढस्नेहो जातः । परं मिलिनाऽवसरस्तु दुष्करः । एवं मिलनार्तध्यानदग्धतयोः स्तयोः कियत्स्वपि गते का
ले कौमुदीमहोत्सवावसरं लब्ध्वा द्वरक निस्सरणप्रयोगगमनसंकेतो कृतः । त्वया तेन च शरीराऽपाटव
मिषेण । गृहांतरे स्थिते । पुनर्यामैकत्रियामागतसरव्यानिस्सरणीप्रयोग कृतः । तदवसरे तत्राऽज्ञातं यत्कृ
तं तत् । श्रूयतां तत्र नगरे एको महाबलनामा दुरोदरिकोस्ति तेन द्यूतक्रीडायां बहुधनं हारितं तद्दुःखेन पी
डितो परिभ्रमति । अस्मिन्नवसरे । महोत्सवागमनं ज्ञात्वा चिंतयितुं लग्न । अद्य रात्रौ समस्तनगरजना उत्सवप रि
करा बाह्ये यास्यन्ति । एवं मम दुःखो नगरे विजनं भविष्यति । तदवसरेऽहं नगरमध्ये कस्यापि धनिकगृहस्य
क्षतिकंध्यादिप्रयोगेन तालकोद्घाटनं कृत्वा धनं लास्यामि । एवं मम दुःखोद्धरणं भविष्यति । इति ध्यात्वा ऽव

सरेऽपरस्मिन्नेकरात्रिगमनसमये धन्यार्थं निर्गतः स परिभ्रमन् दैवात्कृतसंकेतस्थानमागतः तं च दृष्ट्वा
ऽकुशुद्धिसंमागारिकेन ज्ञातमत्र कस्यापि संकेतो दृश्यते। अतो अत्राहमपि स्वांकेलां करोमीति ध्यात्वा
नस्मरणे चालिता। अथ तां कंपमानां दृष्ट्वा सखि तत्रागत्य ज्ञापितो धूर्त्त आगता। युवं तदा धूर्तेन नेत्रेमि
क्त्वा सख्या ज्ञातं सैवागता तत्र स्थितया तया उक्तं च दीपनीकादृता। तच्चिह्नमपि प्रयत्नेन प्राप्तं तत्पात्रं मत्स्वत् तदा
सख्योक्तं। आगम्यतां स्वामिन् तदा द्वयोरपि हृदयोर्धूर्त्तयोः क्रमान्मैत्रीं चरितौ। यावता गवाक्षांतर्यदा मुक्तः त
स्मिन्नवसरे सखि इंदागमनं दृष्ट्वा। हस्तेन दीपो निर्वापितः तद्धस्त गृहे दिवानवपर्यंके मुक्त्वा सखि इंदायो
त्तरं दत्वागता सखी इंदायोक्तं। तापस तया दीपो निर्वापितः। अकस्मात्वशिरान्नि पीमाकि चिंत्यं दिसला तेन
नेत्रे मिलिते। अतो गृहांतरे गत्वा। कार्यं कृत्वागच्छत् इत्युक्तं श्रुत्वा सखि इंदा गृहांतरे गतः। तत्र पुनर धेत
मसी रूपसेन धांत्या तेन समहतत्वसंयोगो जातः सखि इंदलया तरुणो किमपि वक्तुं न शक्ता संयोगाविरामेऽ
पुनः सखी इंदमागतं दृष्ट्वा सख्योक्तमथ नाउत्चरितं गच्छउत्तवानत नुवास्करतक्रियातृटि तदा राद्धेनापरह्री
वागत ऋरितिमत्स्य वाऽमत्स्या मुनिनाइत्युक्तो स्वचिंतितादिपरितं सात्वा। दीर्घं निस्वस्योक्तं स्वामिन् लवउको को
विश्लेषः। निस्संदेहः एवं परं रूपसेनस्य कागतिर्ज्ञाता मुनिराह। अकस्मात्तदतिक्रांतं रूपसेनोपिय ६४
धाऽवसरे सोगसामग्रीमादाय स्वगृहान्निर्गतः। मिलनौ बहु क्वा दर्पसरता रितहृदयौ। अनेक वार्त्ताकरण

उ॰अमी॥
तमोत्पन्न वि
चित्रादिकर्म
णां गति भ्र
तमन्मन्यात्म
त्मश्चेति तता
मामनुयानंत
रंगत्वे चेक्षानि
धाउत्ल्हाति
तदामरवा
अथ धप्रयोग
णगत्वं॥

निरंतरमिलन। अनेक हास्यविलासादि करणमुक्तं कलापित। समस्यादि स्वा वाउर्ध्य प्रगटन विविधासम
नादि प्रयोगेन सुरत क्रियाकरणादि अनेक मनोरथा नुकुर्वन्। अहो इयं राजपुत्री मम परिनिर्व्याजं स्ने
मिऊरंग वत। विस्वतितस्मात् दहमपि यज्जवतत्तह्वत्तुपरं अनया सह। आजीवितं यावत्स्नेहं विरम
णं न करिष्यामि इत्याद्यनेकमनोरथान् संस्तत हृदयो यावदर्द्धमागतति। तावत्स्य एकनिस्वामिकां वास्य स्नि
ति परिकर्मरहिता जलदृष्टी सिथिलीकृतादैवात्। तस्योपरि पतिता तस्याघातेन तस्य शरीरखंडशो जातं स्निग्ध
पतनेजाऽद्व आगत तेन तत्र शरीरं गुप्तं च जातं येन कोपि जानाति। मृत्वा च उरोदरिक कृतसंतोग त्वकु
दौगत्तु स्रात नंकत्ततत्र स्तुत्वाऽस्मिन्नगर राजमंदिरासन्नमोसर्प्यतयोत्पन्ना ततःपरं माआ त्वदाशायं ज्ञात्वा
पाणिग्रहणं करितं बहुदानपूर्वकं विसर्जनं कृत मनेन राज्ञा सहाऽत्रागता। एकदा सर्प्य परिभ्रमन् राज
मंदिरं प्रविष्टः सन् भ्रमति दैवात् युवां दंपती तत्र मनोपविष्टौ वार्त्तां करोति। तत्रागतः त्वदर्शनं जातं दर्शना
त्प्रेमोदो दयो। आचिंत्य तत नजमित्ततो। एकत्र स्थितो निमेषं पश्यति दर्शनं प्राप्नोति। अस्मिन्नवसरे किमपि
कार्यार्थं त्वं गृहांतगमनायोत्थिता तदा तत्सर्पोपि पृष्ठिलग्नो भ्रमति तदा लीतेन त्वया पूत्कारः कृतः तदा
राज्ञा सेवकैर्मारितो मृत्वा च अस्मिन्नेव नगरे हंसो जातः। सोपि नाटकावसरे त्वां दृष्ट्वा हर्षितो कृजतिरस
संगं च करोति राज्ञा मारितः। ततश्च त्वाहं सोजातः सोपि चटहत्याऽद्व स्थितयो युवयोस्त्वां दृष्ट्वा स्नेहवि

धन्नाचरित्र
६५

कजो वायसाऽपराधस्थानंयमारितोमृत्वाचहरिणतयोत्पन्न सोपि श्रावकेत्वंदृष्ट्वा मोहोदयेन नगंनु
नग्नकोति नृत्यति च सरागाद्दतो तस्यमांसंपाचयित्वा सहर्षायुवां। तत्क्षणं कुरुत: दृष्ट्रीकर्मणां विवि
चागतिस्त्वा स्मातिन्त्रिरोधननंकृतं नान्यत् किमपिकारणं। इत्येवंराज्ञा राज्ञी च श्रुत्वा संसारवासावि
रक्तोजातो हाकिमीदृशो संसारस्वरूपंमित्युक्त्वा राज्ञा च पृष्टं मुने किंरागान्धानां इदमेवगतिन
वति मुनिराह राजन् कथमित्युच्यसे रागांधानां वा द्वेषान्धानां वा। हिंसात्मकानां मृषाऽक
मैथुनपरिग्रहान्धानां क्रोधान्धानां। एवंमानमायालोभप्रेमकलहाभ्याख्यानपैशुन्य
रत्यरति मायामोसमिथ्यात्व एतेषां अष्टादशदोषाणां मध्ये एकैकदोषो एकैकवने समाख्य रि
तो अनंतकालंयावत् अनंतान्भवान् नरगतिगोदादिषु भ्रामयति अनेकान् विरूपरूपा
न् विपाकान् प्रापयति तत्स्वरूपं सर्वज्ञ केवलीजानाति परमेकमुखेववक्तुं न शक्नोति विष
कावास्य विचित्रा देवी मृत्वा पशुर्भवति पशुरपि देवः माता पुत्री पुत्रीमाता मातास्त्री स्त्रीरपि
माता पिता पुत्रोपि पुत्रोपिता सेवकोवा स्वामीवा स्त्रीवा बांधवोवा दासोवा भवति शत्रुर्मृत्वामि
त्रोवा प्रीयोवा पुत्रोवा एवंमित्रोपि शत्रुर्वा दासोवा सुभगोवा दुर्भगोवा निष्टोवदुष्टोवा एवंरा
जापिमृत्वा दासोवा ब्राह्मणोवा श्वपचोवा सार्वभौमोवारोगोवा रासभोवा नकुलो कीटपतंगो

६५

वा वेश्यावा व्याघ्रोवा हरिणावा मत्स्योवा भवति एवं सर्वजातिषु जीवे सह सम्बंधाः जायंते न कस्यापि
नियमः यदयं संबंधो न भवति सर्वकाले एकैकजीवेन सह संर्वेपि संबंधाः प्रत्येकं आत्मीयजीवेन अनंतशः प्राप्ता
तेरपि आत्मीयजीवेन सह प्राप्ता कोप्यतादृशो नास्ति चतुरशीतीलक्षयोनिनामध्ये सर्वासुयोनिषु अनंतशः स्पृष्टा
एवं सर्वासु जातिषु सर्वसूक्ष्म लक्षकोटिषु सर्वेषु स्थानेषु च अनंतशः जन्ममरणं च प्राप्तपूर्वमस्ति न कश्चि
त्स्थानं विद्यते अस्यै प्रियावल्लभावति दीक्षानामोतिताव द्रियमेव रिति राज्यादिसुखं ऽहं भरद्वावदा
न्तरमायति बहुदुःखप्रदायकं मिदृशं संसारस्वरूपंश्रीमद्भि जिनेश्वरैर्भाषितमस्ति तस्मात्यद्यस्य ला
यते तत्कुरुष्व एवं मुनिराजोक्तं श्रुत्वा राजा राज्ञी च सर्वेपि निकटस्थाः सत्या वैराग्यं प्राप्ताः राजा स्वंसमु
त्थाय मुनिचरणयोः निपत्येत्युवाच हे निःकारणजगदेकबंधो हे करुणानिधे हे अनाथनाथ हे अशरण श
रण हे समतासरितापते अपारसंसाररूपारमध्यनिमग्नानामस्माकं समुद्धर्ता निजागमनेन सिरोधूननमा
त्रेण धूनापितानि अस्माकं समस्तदुःकृतानि सचेदागमनं चेन्नाभविष्यति तदाऽस्माकं कागतिरभविष्यत्
कनंदापि बदरस्य लाभं प्रणिमुंचत साधननिबंध वित्तस्पृंककर्तुलग्ना हे दयानिधे दुर्लभायाः दुःसी
लायाः कुकर्मकरणैकतत्पराया: बहुलपापसरसारिताया: ममकागतिर्भविष्यति कथमीदृशं प्राय
श्चित्तं केनोपायेन स्फेटयिष्यामि तत्कृपां कृत्वा तदुपायं प्रसादीकरोतु भवान् मुनिराह सद्भवदीययापसं

MEMORIAL

धनावस्वि
६४६

नारादप्यधिकतराणि पापानि चारित्रग्रहणात् श्रीजिनाज्ञानुकूल्याज्जनाश्छूयते शिवं च प्राप्नुवन्ति ततः सु
नंदयाऽपृष्टं स्वामिन् यन्मया पूर्वं क्षेत्रं सदृशमानो रूपसेनजीवो मृगस्तवा श्रुतोऽतः सोऽत्र कुत्रोत्पन्नः साधुराह विंध्याटव्यां सुथ
मनामग्रामे सीमासमीपवनदवेन करिणाऽक्षोद्धस्तिचैनोत्पन्नोऽस्ति पुनः सुनंदा प्राह भगवन् कदाप्यस्योद्धारो
भविष्यति मुनिराह तव मुखात् निजभवसंबंधकविरं वचनं श्रुत्वा जातिस्मरणं भविष्यति ततः धर्मं ज्ञात्वा त
पांसि कृत्वा समाधिना मृत्वा सहस्रारे देवो भविष्यति तत् श्रुत्वा सा तुष्यति अतोऽत्वं दीक्षां गृहीत्वा करणेन स्वं सफलं
कुरु ततः सुनंदा राजानं प्राह स्वामिन् नास्तिकधर्मनीतिविरुद्धाचरणेन पापसंसारे तां कलत्रां कर्म
करणपरायणां निर्लज्जां मां यदि कृपां कृत्वा आज्ञां दद्यात् तदाऽहं दीक्षां गृहीत्वा भवं निस्तरामि राजाह सुस्तु
सर्वेऽपि जीवाः कर्माधीनाः उदयबलेन यत् कर्तव्यं तत् करोति अकृत्यं च कृत्वा जन्मजरामरणरोगसंकुलेन नरगति
र्यगादिचतुर्गतिगहनेन परिभ्रमति सर्वेषामियं स्थितिः अन्यतैवास्ति यावत् गृहवासे स्थितोऽस्ति तावत् अहमपि त्वं
कृतः अतोऽहमपि नरगफलं राज्यं त्यक्त्वा संयमं लातुमुत्सुकोऽस्मि ततो यस्य कस्यापि संसाराद्भयं भवति सु
खेन स भागवतीं दीक्षामंगीकरोतु ते सर्वे मम आत्मीयाः श्लाघनीयाः धन्याः सन्तु ततः सामान्य पौरसंबंधानेति राज्ञोक्तं श्रुत्वा
सर्वेऽपि सत्याउद्यायराज्ञोऽग्रे निवेदयति स्वामिन् अहं वयमपि चारित्रं ग्रहिष्यामः सेवकानां हि स्वाम्यनुसरण ६४६
मिति सेवकधर्मं सफलीकरिष्यामिति तन्निर्णयं श्रुत्वा राज्ञा महर्षिमुनये विज्ञप्तं स्वामिन् मम लोकव्यवहारेण रा

ज्यं पुत्राधीनं कर्तव्यमस्ति तत् कृत्वा युष्मत्पार्श्वे चारित्रं ग्रहिष्यामीति अतो दयां कृत्वाऽस्मन्नगरोद्याने दिनद्व
यमात्रमत्र स्थातव्यं यन्मे मनोरथतरुः सफलो भवति मुनिराह राजन् यदि तवेदृशो मनोरथो भवति तदागव्यु
ति परिमाणमार्गासन्नग्रामेऽस्मद्गुरवः समवसृताः सन्ति तत्रागंतव्यं चिंतितार्थं च कर्तव्यं वयं तु गुरोराज्ञां विना स्था
तुं न शक्नुमः धर्मलाभोऽस्तु तदाधुना वयं यामः इत्युक्त्वा मुनिद्वंद्वं गुर्वंतिके गतं राजापि स्वगृहमागत्य राज्यं सून
वे दत्वा सर्वेषां क्षामयित्वा महर्द्ध्या गुर्वंतिकं गत्वा गुरुं वांदित्वा सपरिकरेण राज्ञा सुनंदया च सविनयं दी
क्षाप्रार्थनं कृतं मुनियुगलोक्तं विज्ञातमतिकरेण गुरुणापि त्वा घयीत्वा सपरिकरस्य राज्ञः तथा द्विभार्यायाः सु
नंदयाश्च दीक्षा शिक्षापूर्वकं दत्ता अथ राजर्षिरपि अत्युत्कटभावेन महर्षिग्रहणमेव नाऽभ्यासं करोति सु
नंदायास्तु महत्तरायाः प्रवर्त्तिनीसमीपे स्थापिता सापि तत्र श्रुताभ्यासं ज्ञात्वानुरूपं तपश्च करोति अथ राजा
ऽऽदश्यवर्षपर्यायमत्स्फटं निरतिचारं च संयममाराध्य कर्म क्षपयित्वा केवलज्ञानमासाद्य अंते योगनिरोधं
कृत्वा मोक्षं जगाम राज्ञः परिकरजनापि केपि मोक्षं केपि च स्वर्गं गताः ऋषिसत्तः मनुजत्वं प्राप्य मोक्षं यास्य
ति अथ सुनंदा साध्वी अतिवैराग्यरंगरंजितहृदयाऽत्युत्कटतपोबलेन अवधिज्ञानमुत्पाद्य महदाक्ष्या
देन संयमं निरतिचारं निर्वहति एकदा प्रवर्त्तिन्यग्रे ज्ञापयित्वोक्तं मातः पूर्वव्यतिकरं महर्षिसमस्तवाः संजाताः "सजीव
निरर्थकं क्लेशमनुभवन् अनिर्वचनीयदुःखाकरे पतितोऽस्ति अतो यदि भवदीयाऽज्ञा भवति तदाऽहं तत्र गत्वा

तंप्रबोध्यदुखाकरात्समुद्धरणंकरोमि प्रवर्त्तिन्योक्तं वत्से त्वंज्ञानकल्पासि यदितवज्ञानेनालंप्रतिभासते
तदातत्रगत्वास्वमुखेनतंप्रतिबोधयत्व धर्मंप्रापयनायेनाराधकोभवति तदासुनंदामहत्तराया राज्ञोआज्ञांलब्ध्वापंचशति
साध्विभिः सहविहारोकृत क्रमेणस्तुग्रामग्रामंप्राप्ताग्रहस्थानांपार्श्वात्वसतिंयाचयित्वातत्रचतुर्मासिकंस्थिता
प्रत्यहंतत्रभूप्राविकानांधर्मोपदेशेनधर्मदृढिंप्रापयति अथतत्रग्रामासन्नपर्वतवनगह्वरेषु सरूपसेनजीवोहस्ति
स्तत्वेनोत्पन्नोनि वसतियदिपरिभ्रमन् ग्रामानुग्रामसीमायामागच्छति तदासीमस्थितलोकानांउपद्रवंकरोति
त भनानांपृष्ठधावति केचिद्वृक्षेचटंति केचित्पलायित्वा ग्रामंप्रविशंति केचित्अन्यस्थानमलभमाना
तस्यदृष्टिंवंचयित्वालतांतरसंकीर्णे जालांतरेअदृश्यतया स्थीयंते केषांचित्स्वविषयमागतानां शुंडे
नगृहित्वागगने उछालयति ततःपरंयथा यथायुर्बलेनकोपिपीमांसंप्राप्य जीवतिकोपिमरणमाप्नोति
कस्यापिउरःस्थलेनगृहित्वाभूमौ आस्फाल्यमारयति कस्यापिजीर्णवस्त्रवद्विदारयति एवंलोकानामुपद्रवंकृ
त्वा पुनःगह्वरेयाति यस्यकस्यापि सीमायामचरपकार्यार्थंगतव्यं भवति तस्यचित्तेभयशल्यंननिवर्त्तते
तस्मिन्नगरे सर्वेपिलोकाः हस्तिभयेनत्रासमानास्तिष्ठंति अथान्यदासुनंदाआर्यया ज्ञानबलेनज्ञातं
कल्यप्रभातेसीमायांग्रामनिकटेहस्त्यागमनंभविष्यति इतिसंप्रधार्य प्रभातिकप्रतिलेखनंकृत्वा विचारभू ६६
मिगमनमिषेण नैकांत्साध्व्यासहनिर्गतायावतागोपुरसन्निभागता तावताहस्तिभयात्रासमापन्ना भयेन

वेपमाना श्रावकागत्यपुराद्बहिर्गच्छंति साध्वींदृष्ट्वा वक्तुंलग्ना मातार्यिकेमाबहिर्गच्छ यद्यमसौदुष्टोहस्ति
ग्रामासन्नपरिभ्रमति मानुष्यंदृष्ट्वाऽपृष्ठधावति हस्तिचटितंमारयत्येव अतोइतःनिर्दृस्यवस्थानंगच्छ
त अधुनागमनाऽवसरोनैवास्ति इतितेषांवचःश्रुत्वा सद्यायातामार्यिकांप्रत्युक्तं लोऽमुकार्यिके यूयं
त्वत्रैवातिष्ठतु तयोक्तंतद्धत्ति परंत्वंएतेभयेनकंपमानागच्छत् बहिर्गमननिषेधंकुर्वंति तत्कथंमगच्छ
न्यागमनंक्रीयते सुनंदार्यिकयोक्तं ममकोपिभयोनास्ति यतोऽस्यचप्रतिबोधनार्थंयामि अयंहस्ति
रपिप्रतिबोधंयास्यति ग्रामलोकानामपिभयंनिवर्त्तयिष्यति शासनोन्नतिंचभविष्यति अतोचिंता
नयं लेशोपिनकर्त्तव्यःसर्वंभविष्यति इतिशिक्षांदत्वा एकाक्येवसुनंदाऽऽर्या बहिर्गंतुंप्रावर्त्तीत्तदाह
रनिकटस्थे लोकेप्रक्रंतंलोऽर्यिके बहिर्मागच्छतहस्तीतवप्राणांतंकरिष्यति किमर्थंनिष्कारणमनर्थे
पतसि सुनंदातुमौनमाश्रयमार्गेगच्छति गोपुराद्बहिर्गता तदाचटादिमहाट्टकोपरिस्थितालोकाः ब
हिर्गच्छंतींसाध्वींदृष्ट्वा महतारावेनवारयंति मायाहि२ इतिपुनः२ वारयंति सुनंदातुकिमप्युत्तरंन
ददाति निर्भयंगच्छति तदापुनःलोकाःपरस्परंविवदंति किमयंसाध्वीबधिरास्ति किमियंग्रथिला
स्ति किमियंस्तनाविष्टचित्तास्ति यतोएतेषुवार्यमाणेषु लोकेषुननिवर्त्तते परंत्वस्याःकठोरहृद
यत्वं तलोकेनाप्युक्तं मियमार्यासर्वसामार्थ्यकाणंमहत्तरास्ति नकठोरहृदया नापिकर्णेबधि

धन्नाचरित्र
६९

रास्ति नरपतिनास्ति इयं तु गुणवती बहुश्रुतधरा देशनामृतदानेन बहूनां विषयकषायरुजं निवा
पयति अस्या दर्शनमात्रेण महत्पुण्यं भवति एतत्तु जानामि इयं यत्करिष्यति तद्वरमेव करिष्यति पुन
रेकेनोक्तं यद्भवद्भिरुक्तं तत्तु सत्यं परं किं जानाति सा हस्तिमरणभयविप्रमुक्ता निःस्पृहा ह्यस्या उपसर्गसहना
र्थं तु नगच्छति श्रूयतेऽनेकैर्मुनिभिः सन्मुखं गत्वा उपसर्गसहनं कृतं मुनिस्तूपसर्गसहनेन स्वका
र्यसिद्धिं करोति परंतु यद्ग्रामसीमायां मुनेरुपसर्गो जायते तस्य ग्रामस्याऽशुभं भवति अतो विषादं वि
तनमावहति एवं वदतां लोकानां हस्तिदृग्पथमागतो हस्तिनापि आर्या दृष्टा दृष्ट्वा च सामान्यमनुष्यवत्सा धा
वितः यावत्सा निकटमागतस्तयोर्द्वयोर्मिलनं संजातं तदा तु पुनः मोहोदयो जातः कोपस्तु शांतिमाप
न्नः तत्र स्थिता घूर्मयति मनसि आह्लादं चाप्नोति तदा साध्व्योक्तं भो रूपसेन बुध्यस्व २ कथं मोहमूढो दुः
खं प्राप्नुवाणोऽपि ममोपरि स्नेहं न त्यजसि मदर्थं क्लेशपरीषहं सहमानस्तवाऽसंजातं निरर्थकं मन्निमित्तं पञ्चसुभ
वेषु षड्वारं मृतोऽयं सप्तमो भवः संजातोऽद्यापि मम स्नेहदुःखैककारणं प्रेमबंधनं कथं न मुंचसि इति तव
अनर्थदं प्रेमदं मन्यसे यतः रूपसेनो गर्भगतो सर्पो ह्यंडो मद्दंसकः मृगोऽपि मारितो जातो हस्तित्वं सप्तमे भ ६९
वे २ अतो स्नेहबंधनं त्यक्त्वा वैराग्यं भज अथ हस्ती तिसाध्व्योक्तं श्रुत्वा ईहापोहं कर्तुं लग्नः मयेदृगव
स्थाऽक्षराप्यनुभूताऽसंभाव्यते इत्येवं चिंतनं कुर्वतां तदावरणीयकर्मणां क्षायोपशमगुणेन जातिस्मरणं सं

१ भवे संज्ञिपंचें
द्रियत्वात् नि
रंतरा न भवति
तदा न वस्त्वं
या वस्यपति
नाधिका: इत्या
वश्यके:

जातं संज्ञिपर्याप्तकपंचेंद्रियत्वात् सप्तापि भवा दृष्टा सर्वमप्यनुभूतं स्मरदुःखस्मृतिपथमागतं तदाव
ज्राहतमिव वक्षणं जडमिव निश्चेष्टितो भूत्वा पुनः सावधानो भूत्वा दीर्घनिश्वासं विमुच्य हस्तगतं चिंतामणि
मिव शोचयितुं लग्नः हा मया अज्ञानांधेन कामांधेन दृष्टिरागांधेन च किं कृतं कोटिचिंतामण्यादधिको प्राप्तो
मनुजभवो हारितो दुर्गतिगहनं भ्रमणं भ्रमणं चांगीकृतं तं स्वाऽज्ञानवशेनाऽकृतकर्मोऽपि कृतकर्मा द
प्यधिकतरं दंभसंकटे पतितः येन मया साधनविकलो दुर्गतिकारागारो प्राप्तः अस्मात्कारागारान्मां
को निष्कासयति हा मम का गतिर्भविता अस्मिन् हस्तिभवेऽपि बहूनि पंचेंद्रियतिर्यग्मनुष्यघातादीनि
पापानि कृतानि अतो मम दुर्गतिनिस्तरणं कुतः भविष्यति धन्येयं साध्वी यत् युद्ध्वा बुद्ध्वा चोद्धरि
ता यया दुष्कर्मचक्रं भुक्त्वा समस्तदुःखनिवारणैककारणो साधुधर्मोऽंगीकृतः अतोऽस्याः कालीति पुनः
धन्या इयं यथा यादृशोऽश्लेषो कृतः तादृशो निर्वहितः यथा च स्वयं स्नेहनिगडान्निर्गत्य मां स्नेहबंधनान्मो
चयितुमागता यतोऽस्मिन् स्वार्थिकसंसारे महाघोरे च दशायां को दुःखनिवारिणो पापकरणाय प्रेरयति अतो
शास्त्रोक्तिः सत्याऽस्ति यतः स्वार्थिकाः संसारिणः परमार्थिका मुनयः जगति विना मुनेः न कोऽपि निष्कारणोपकारका
रकोऽस्ति ममाप्यनयाऽस्याः स्मरणाऽवलंबनेन आयतिः शुभा भविता नाम किमप्युपायं पश्यामि अतो इयं यदुपा
यं वक्ति तन्मयांऽगीकर्तव्यमिति निश्चय यतो मम पापिनो दर्शनमात्रेणापि पुण्यवतामपि पुण्यं विफलं भवति

अस्याः वचनमात्रेणैव सर्वेऽपि इहपरलौकिकसिद्धिर्भवति पापिनोऽपि पापान्मुच्यते सर्वगुणरत्नखानिरिति नि
श्चित्य बदरस्तु जानि स्वज्ञानाभरणानि विमुंचयन् साध्वीनिकटमागत्य शुंडेन पुनः २ प्रणामं कृत्वा तारस्व
रेण चित्ताह्लादिकं बृंहितं सा भगवती यूयं भवसमुद्रतारणमोक्षप्रवहणे चारित्रयानपात्रे चटितास्तोऽकेने
व कालेन पारं प्रापयिष्यसि परं तु मम का गतिः एवमस्तु भगवत्या महानुपकृतिश्चैताऽधन्यनयनद्वानभिव
यन्मया त्वं दृष्टा जातिस्मृत्वा सद्विपाको दृष्टः दृष्ट्वा च साध्व्याऽसमर्थतिर्यग्भव वेदनात् सद्यथाकुलो
वेद्धरणमागतोऽस्मि यस्तु संसवासितकृकृतः साध्व्या ज्ञानेन तदाशयं ज्ञात्वोक्तं भो रूपसेन कापि चिंता माकुरु
यत्त्वं पर्याप्तिकपंचेंद्रियोऽसि स्फुटक्षयोपशमवानसि पंचमगुणस्थानप्रापणाऽर्होऽसि जैनमार्गानुसारी सद्द
शोऽपि दुर्गतिपातान्मुच्यते तदाश्रुतागमश्रावकस्य किं कथनं अतोऽश्रीजिनाज्ञायां दृढतां कृत्वा यथाशक्त्या
तपं कुरुष्व यतो तपबलेनानेके तिर्यग्गतिजीवाः स्थितास्ततो विषयकषायवासनां विमुच्य तपस्यायां प्रव
र्णोऽस धन्येनत्वं दुर्गतिपातान्निस्तरयिष्यसि इति हस्त्यार्यिकयोरुत्तरप्रत्युत्तरं श्रुत्वा ह्यधो परिस्थितालो
काश्चमत्कारं प्राप्यावदंति अहो इयं ज्ञानगुणसंभागारिकेयमार्या परमपूज्या दर्शनमात्रेण हस्तिनः बोधि
तो सेवकवत्सविनयं प्रमुखाये स्थितो उत्तरप्रत्युत्तरं करोति अतिकोऽयं नासि लोऽपि समसि लोक्त्वाऽग्रे स्थि
तः अतोऽद्य मासाध्वीतीर्थरूपा परमोपकारिणी अतोऽचलत्तवान् अस्माभिर्वंदनं कार्यं तथ्यस्तु नास्त्येव सुखे

नागम्यतां एवं वदन्तो लोकाः हृष्टाः उत्तीर्य आर्यिकां नत्वा स्तुत्वा च परितः स्थिता एवं दृष्ट्वा दुर्गरक्षकालोऽपरि
स्थितापि आगता सहस्त्राः मिलिता अद्भुतप्रतिमुखं वार्ता विस्तरन्तु राज्ञोऽग्रे केनाप्युक्तं अद्य अत्रत्या आर्यिका
ममीमायां महदाश्चर्यं जातमस्ति राज्ञोक्तं किमाश्चर्यं सर्वव्यतिकरं पूर्वकथितं स्वामिनं प्रति प्रत्यग्रामे हस्तिनस्तयो
र्निर्वृत्तः राज्ञापि तमाश्चर्यं श्रुत्वा बहुसैन्ययुक्तोऽत्रागतः आर्यिकां नत्वा पृष्टं भगवति किमिदं आश्चर्यका
रकं व्यतिकरं प्रसादं कृत्वानुग्रहं करोतु तदा सा साध्व्यपि विषयासक्त विपाको यावद्धस्तिना चित्तप्रीतिक
तासाध्या च तदुपायो दर्शितस्तावत्सर्वं तत् वृत्तान्तं श्रुत्वा सर्वेऽपि चमत्कारं वैराग्यधर्मं प्राप्ताः राजन्ययं सर्वगुणा
न्वितो लब्धजातिकोऽहस्त्यस्ति यस्य गृहे तिष्ठति तस्य गृहे ऋद्धिप्रतापं च वर्द्धते एवं हृदशलक्षणः पुनः धर्मवा
न् धर्मकचिकृमि लति अतो यूयमस्य प्रतिपालनं करोतु तथा तत्र जीवदयागुणसंगमाधर्मीकवात्सल्यं तप
स्वीसेवितिश्चत्वारोऽपि जासातविष्यति इति आर्यिकयोक्तं श्रुत्वा सहर्षो राज्ञोक्तं यद्ययं ममाग्रजानेस्वयमाग
च्छति तत्र सुखेन तिष्ठति तदाऽहं आयुपर्यंतं यादृशी विधि सा ध्वीसमुपदिश्यति तत्सर्वं कर्मस्य श्रुत्वा प्रत्यहं
कारयामि धन्योऽयं यस्तिर्यग्भवेऽपि धर्मंगीकृतः अतो हस्तिराज सुखेनागच्छतु मम आज्ञाने इति श्रुत्वा ह
स्ति स्वयमेव चलितो ग्रामाभिमुखं यावद्धस्ति निवासशालायां गत्वा स्वयमेव स्थितो राजापि साध्व्यादर्शि
तमार्गेण हस्तिं पालयति तद्यमादिन त्रयं षष्ठतपं करोति तृतीयदिने निर्दूषणाऽऽहारेण पारणं कं का

रापयति पुनः पृष्टवान्ः इत्येवं आचार्यीवंतपधर्मं ब्रह्मचर्यधर्मं चाराधयन् सकलश्रुतसारं च नमस्कार
महामंत्रं स्मरन् निर्विघ्नायुः समाप्तिं कृत्वा सहस्रारे ऽष्टादशसागरायुष्क देवो समुत्पन्नः ततश्च्युत्वा विदेहे
सत्स्यति स्कंदाचार्यपि राजपुत्रस्तिन् बहून् भव्यजीवान् प्रबोध्य जिनशासनोन्नतिं च कृत्वा पुनः प्रवर्त्ति
नीसमीपगत्वा प्रवर्त्तिन्यापि शिक्षापिता आचार्यीवं संयममाराध्यातितीव्रकर्माणि क्षपयित्वा केवलज्ञान
मासाद्य अक्षयपदं प्राप्ता एवमसेविता पि विषयाः इष्टत्वेन संसारचक्रे दुर्गतिगहने भ्रामयति तदा इष्टत्वे
न सेवमानस्य कागतिस्तविष्यति संसारचक्रे चिरायपूर्णतायां दुःखं वेदयति भर्तौ च सुखं मन्यते इति सत्या
लिनं दृष्टौ नारितिपरं न जानाति यथा धीवरपलखंडं दृष्ट्वा मत्स्यानां मरणसंकटे पातयति तद्वत् विषया
प विषयामिषलवं दत्त्वा अनंतशो मरणसंकटे पातयति एतत्सुमहदाश्चर्यं अनंतशो मुक्ता अपि विषयाः
अज्ञानवशगा जीवाः कदापि अनास्वादितेव सेव्यमानो माद्यति पुनः यथा श्माद्यति तथा रुद्रकर्माणि
स्थिति वर्द्धयित्वा नारे निगोदावटे पतति तस्मात् श्री जिनवाणीं श्रुत्वा विषयकषायान् हरतः त्यक्त्वा श्री जि
नचरणसेवां ब्रह्मचर्यं च लज्जस्व इत्येवं मुनिदेशनां श्रुत्वा विषयान्हेयत्वेन हृदयाश्च हृदयन् महानर्थमूलं प
रकीयास्त्रीसेवननिषिद्धरूपं स्वदारसंतोषव्रतं मुनेः पार्श्वान्गृहितं ततो धन्य आत्मानं धन्यं धन्यमानः सहर्षपु ७०
नः २ मुनियुगलं प्रणम्याग्रे ब्रह्मचर्यभावनां भावयन् मर्गमतिक्रामति निर्लयं चित्तप्रशान्त्या क्रमेण स्फ प्रका

DR. BHAU DAJI
डाक्टर भाऊदाजी

शि तवृक्षपनिध्यसौ कालिपुरीं प्राय ततो नगरा ऽसन्नसुरसरित्तटे शुचिप्रदेशे वस्त्रादिकं विमुच्य ग्रीष्मा
र्कतापेन खेदितसर्वांगो ऽसौ तत्खेदनिवारणार्थं रेवायां गजमिव सत्वरं मायां गंगायां जलकेलिं कृतवान् त
तो गतश्रमो लब्ध्वा यथाप्राप्तमाहारादिकं कृत्वा नवनीतकोमलायां गंगातटगत वालुकायामास्तरणं कृत्वा
संध्यासमये श्रीमान्नमेयमहिमागारं परमेष्ठिनमस्कारं पठन् स्थितस्तावता क्षीरार्द्र निर्गता गंगाधिष्ठायिनी
गंगानाम्नी देवी तत्रागता अभ्रचंद्रयोत्स्नात्तिर्हविलीकृतावन्यां तस्मिन् रजन्यां सकलगुणैकनिधेः धन्यस्या
नुपमं रूपं सौभाग्यं निर्माणं चात्यद्भुतं चिलोक्य तीव्रवेदोदयात् तीव्रकामरागातुरा ऽसौ तत्र रागातिरेकात्स्वे
च्छया गंगायाः चेतसि प्रबला ऽकुलता समजनि यतो पुरुषवेदोदयात् स्त्रीवेदोदयो ऽत्यधिकाततरो भवति
कामशास्त्रे पि पुरुषात् षड्गुणो कामः स्त्रीणामिति हि निश्चितं एतादृशो दुर्निवारस्मरशरपातसमतिको स्थि
रो भवति जिनागमाविदु कर्णे निकोपीस्यर्थः अथः सा देवी कामवशा लज्जादिकं मुक्त्वा दिव्यरूपाप्रसन्नीभू
य महतामोहेन धन्यस्य मोहनाय बहून् हावभावान् व्यधात् अमूर्तजल्पानुकटाक्षाश्च शराणि चतस्यो
परि क्षिप्तय तदा धन्यो पि धीरतामवलंब्य जितब्रह्मव्रतरूपसन्नाहो हृदि दध्यौ पुनः साबाहुमूलत्रिवली
मध्यनाभिस्तु कुचविभ्रमाकेशादि विसमांश्च कामस्याक्षीणकोशानिवमऊर्मुहुः अदीदृशत् युवमनो
ऽव्यद्रावणक्षारसदृशाः तया लक्ष्या कृताहावभावकटाक्षविक्षेपादिनाराचाः शुद्रखाणीसंपन्ने

धन्यचरित्र
७१

वक्रे लोहघनाइव धन्ये विफलीभवंति स्म तदा द्वावनावैरकृतितं धर्मं दृष्ट्वा पुनः सा सोन्मादा शृंगाररसगर्भितं
परमोन्मादोद्दीपनगुणमनगाराणामपि क्षोभजनकं कामीजनमनवश्यकरणौ वचो वाणीमेत्य ताणी नृ हे
सौभाग्यनिधेरहं ग्रीष्ममध्याह्ने तिग्मोकजलसरसीतापितां सफरीमिवात्यर्थं कामानलज्वालेज्वलितवक्षर
णागतास्मि अतो दयानिधेः शीघ्रं स्वांगसंगमरूपामृतकुंडे मां क्रीडयं ममेप्सितपूरणसमर्थस्त्वमिति मत्वा त्व
द्गुणाक्षिप्तचित्ता हं प्रार्थनां करोमि त्वया च ममाशा पूरणीया प्रार्थनाभंगो हि महद् दूषणं यतः शास्त्रेप्युक्तं ॥
तणलहुअं तूलं तूलाउ वि लहुओ मग्गणो लहुओ पत्थणाविलहुअयरो पत्थणभंगो कओ जेण १ अ
तो यद्यद्य मया सार्धं स्मरतक्रीडां कृत्वा मम कामार्त्तिं निर्वापयेति तस्या वचांसि श्रुत्वा परनारीपराङ्मुखः
धन्यः साहसमवलंब्य गंगादेवीमिति अवक् हे जगन्मातर्मे हे मातः अतः परं एवंविधधर्मविरोधकवाक्यं न
वाच्यं तथा तव हृदयस्थस्तनराहसकृतचिन्हो लग्नो मे मनसि तद्यं प्राप्नोति कथं कुविकल्पकंटकध्वंसी श्री
मज्जैनागमोक्तवृत्तमंत्रपवित्रीभवत्वात् नचधनंजयस्य श्रीद्दे सनिभो स्पृहं तनो ऽतिदुर्वारैः कामास्त्रैर्मम कृतगात्रं
न भिद्यते पुनः कालकूटविषवदुत्कटाः निर्मंदाक्षास्तेतव कटाक्षाः श्री जिनवाक्यामृतांबुमत्तचित्तं न पी
डयंति हे कुरंगाक्षी तव काकुवाक्यकुरंगाः मम जाग्रद्धर्मसिंहा मनोगुहां स्पष्टमपि समर्थाः पुनरेते ता च कि ७१
नाः विचित्रविकृतिस्तु कामस्मनोज्ञाः मम मनसि तिले विलीनभवंति यतो विरिपुकुसमपुंजाः किमु अस्

तित्तिले दकाभवंति हे वामस्तु मे घावत्सरसाद्यितव विलासा दृष्टरा जघरक्षेत्रकल्पमङ्क्षितेरांगां कुरोफमदेत तो
नभवंति हे वामाक्षि दावानलवत् उत्सहास कामाचित्तविकारजनकास्तव हावा अपि श्रीमदागमसागरमग्नं मां
तापयितुं न समर्थाभवंति हे मुग्धे नरकांतप्रापिका परकांता पराङ्मुखे यत्र मयि सा धर्मादिकल्पयासिन्युः रंभा
त्तिलोत्तमाद्याः सर्वाअपि अप्सरसस्तर्हि त्वत्सदृशीनां का गणना हे देवि नरकज्वालावलिसंगजनितदुःख
त्रस्तस्य केन पुमान् कामसंज्वरोदयेपि परस्त्रीसंगफलं खाल्कू पवसने हि कदुःखमात्रज्ञो ललितांगकुमारवत्
परकांतालोलुको वांछति नैव वांछतीत्यर्थः लोलडे येनराइ हलवे विषयसेवनकाले क्षणमात्र परस्त्रीसंयोग
जनितं सुखमनुभूय प्रसीदंति ते नराः परभवे परस्त्रीसंगजनितकर्मविपाकोदये नरकक्षेत्रे नारकीत्वे
नोत्पद्य संख्यातीतकालं यावत्तत्रागाढं क्षुधादिदशप्रकारं परमाधार्मिककृतं च दुःखमनुभवंति यदुक्तं:
नरयादस विहवेयण सि १ उसिण २ खुह ३ पिवास ४ कंडु ५ हिं ६ परवस ७ जर ८ दाह ९ भय १० सोगं च १०
वेयंति १ पुनः खणमित्तसुक्खा बहुकालदुक्खा पगाम दुक्खा अणिकामसुक्खा संसारमुक्खस्स विपाकत्तया खाणी अणत्थाण उकामभोगा
खिणमित्तसुक्खा बहुकालदुक्खा २ इत्यादि श्री जिनागमोक्तं सत्वज्ञ पुरुषाः कंदर्पबलपरवशा कथं भ
वंति ज्वालत्ज्वालानेलंतप्रविश्य मरणकरणं वरं परं तु अन्यस्त्री त्रिवली तरंगत्तरंगे नरकजलधौ पतन
कारणं परस्त्रीमिलनमतिदुष्टतरं यदुक्तं योगशास्त्रे नपुंसकत्वं तिर्यक्त्वं दौर्भाग्यं च भवे भवे भवेन्नराणां

स्त्रीणां वा ऽन्यकांताऽऽसक्तचेतसां। २ वरं ज्वालदयस्तंभस्य परिरंभो विधीयते न पुनर्नरकद्वार रामाजघनसेव
नं २ अतः कारणात् हे स्वामिनि योषित्संगा संध्याऽभ्ररंगतरलाः मनुष्यायुर्युना वायुवदस्थिरं भोगक्रि
याविशेषेन दुष्यानुयोगतो वा स्थिरो भवति न पुनर्बुद्धिमतां सुभोगाधिकतरस्तु न चोत्पन्नरोगइव तद्भोगाय भव
ति यतः भोगे रोगभयं सुखे क्षयभयं वित्तेग्निभूभृद्भयं दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयं
माने म्लानिभयं बले रिपुभयं देहे कृतांताद्भयं सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयं। १ एवं सामान्यतो
पि कामभोगाः प्रबलदुःखहेतवो भवंति किं पुनः परस्त्रीसंगमो ऽत्यंतं विकृतविषमिवातिव भयंकरमरणहेतवो
जायंते हे चित्त्वमपि मनस्थिरं कृत्वा परिभावय यदि हरिशचिदिव्यशक्तिप्रस्तुतस्फुरत्सुखसंयुक्तास्त्रियालंघा सा कामभो
गत्यागफलं वा कामभोगासेवनफलं प्राप्नुत्त चिरया गरशक्तानां हि नरकतिर्यग्भवो ऽत्तारादासवति तस्माद्धेनितं
बिनि तव वैक्रियदलनिष्पन्ना तनुः अतीव सुखस्पर्शा वर्त्तते मम च पुनः अदारिकदलनिष्पन्नानित्यं यद्वात
हा अन्नादिशक्लामजप्रवृत्तरुधिरस्थिलताऽतीव दुर्गंधदुर्गंधिनीयाऽनयोः संयोगः कथं कर्त्तुमर्हति तस्मात् हे
मातः सदाचारां कुरु मम ईदृशं विनीधारासदृशं वीतरागं मनः कृत्वा वितरागं स्मरयेन तथा यन्ति श्रेयसि भवति
यदुक्तमस्ति धर्मकार्ये सदोद्यमेन त्वराकार्ये अधर्मकार्ये पुनः कृत्वमे गजनिमीलिका कर्त्तव्या गजवदक्षिनि
मिलनेन साध्यं आलस्योपहतं कर्त्तव्यमित्यर्थः यतो दैवतस्यापि गलितं वयः न प्रत्येति इत्येवमनृतसंदेशेन

सुखश्रियां सदेशेन धन्योपदेशेन गतरागा गंगा इति जगो हे मम रागदावाग्निसमनैकघनं बुद्धत्वं चिरं
नंद हे मोहांधकारसंहारदिवाकरस्त्वं चिरं जय सर्वोत्कर्षेण वर्त्तस्व हे निष्कामी शिरोमणे जगत्त्रये त्वमेव
धन्योऽस्ति यत् देवांगनाकृतहावभावैर्न क्षोभितः तस्मात् हे वीरेंद्र अत्युत्कट विकटकां दर्पकटकाद्वचे
नैककामास्त्रसंनिपातेपि अक्षतस्सन् कंदर्पविजेता त्वमेव महासटोसि हे सदाचारशिरोरत्नगर्नापृथ्वी
ति यदुच्यते तु पुर्यैव कृत्वास्ति हे निष्पाप हे धार्मिकशिरोमणे ऽहं मयि तव दर्शनात् प्रविश्रासयं हे दयानिध
त्ति नीरपूरैरग्निविध्यापोऽयं मम कामाग्निस्त्वयामृतकल्पाख्यागिः यदि ध्यायत् भो तत्त्वविदांवर अहं भोकद्
यामित्तसुखदायिधर्मरत्नप्रदायिनेऽत्यंतं संप्रति सूरिनानिदत्वा कृपमनंतणाः स्यां कृपमपि न भवेयमित्यर्थः
तथाप्येतत् चिंतारत्नं गृहाणमां चानुगृहाण इदं रत्नं तत्त्वोपकारस्य कोटयंशेनापि प्रत्युपकारं कर्त्तुं वाऽहं
तिपरं तु यदतिधैराग्निश्चीरस्वगेहानुसारतः भवति अतः कृपानिधे कृपां कृत्वा त्वयेदं ग्राह्यं इत्येवं मा
तनिर्बंधतः धन्यः चिंतारत्नं लाचार्यं बोधंबंधः ततो संजातधर्मरंगा गंगा बद्धांजलिः स्तवनालिः स्तुत्वा स्वस्थानं
जगाम अथ धीरस्कृतो धन्यो पि राजगृहोन्मुखं प्रतस्थे धन्यवदान्यमान्यमहिमा धन्यो देशांतरे भ्रमन् सततं
चिंतारत्नप्रभृतिः सकलभोगसमग्रीसुखमनुभवनः एवं दत्तदानफलानुभावतो मुधेनमराधं प्राप्तः अ
होलोभव्यजनाः युष्माकं यदि सुखानां प्रकर्षो वा वर्त्तते तदाऽत्र श्री जिनकीर्त्तितं दानपुण्यं रतिं कुरुत येन मनो

रथसिद्धिर्भवति ॥ इतिश्रीतपागच्छनायकभट्टारकश्रीसोमसुंदरसूरिविरचितेपद्यबंधेश्रीधन्यचरित्रशालिनी
श्रीदानकल्पद्रुमेमहोपाध्यायश्रीज्ञानसागरगणिशिष्यात्म्यमतिग्रथितेसंस्कृतभाषागद्यबंधेस्वर्णसिद्धिविदेश
प्रस्थानवर्णनोनामचतुर्थपल्लवसमाप्तिमगमत् ॥ ४ ॥ छ ॥ ग्रं ५११ ॥ अथपंचमप्रारभ्यते: ॥ अथोदारमु
ख्योसौधन्यः धरणीधरधाम्य धनादिसुलवस्तु सिसंग्रहार्थ मागधान् मागधानिवप्रसन्नयादृष्ट्याकृतार्थवृत्
ततोसौधन्यः ॥ अहार्यचित्तौर्यस्तुरगुरुरिवपरिभ्रमन् क्रमेणराजगृहंनगरंप्रापद्विगुरुकोऽयमर्थयोऽस्तुप्रप
दंतिश्रुतिसः राजगृहनगरंवर्णयति यस्मिन्नगरे मनोहारिणारूपेणअपहारिणांगृहाणि स्वभित्तिगतमणि
त्विषा महाऽमरगृहाणिविमानिहसंतीवभाजते पुनर्यत्रसूर्यकांतरत्नमयवप्रचंद्रकांतमणिमयानिकपि
शीर्षकानिदिग्विदिग्द्योतयंति पुनः यत्रखातिकाजलश्रीमत्ता भोरविचंद्रोदयेकरोत् पुनः यदीयेभ
मगृलक्ष्मीकरवमासिरामं मणिमयेस्तुंगगृहैः गृहीतसाराधसदांविमाना लघुत्वाद्वायुनोद्वीनाइव
भान्ति पुनर्यत्ररत्नमयगृहांगणेजित्वेजितरत्नतोरणकेप्रतिबिंबितमयूरस्वरूपे क्रीडामयूरगृहणे
च्छया प्रसारितकरामुग्धा प्रस्फोटीतकरायतयाविलक्षालवंति स्वकीयमुग्धत्वं सोचयंति पुनः यस्य
स्तवोऽशेषंगरिमत्वं बुधोपिवक्तुं कथंशक्तोत्रिजगत्स्तुत्य श्रीवर्द्धमानस्वामीरपि यांस्वस्यपदारविं
देरपुपूजत् पुनः यत्रगृहोपरिस्थापितध्वजाग्रजाग्रन्मणिकिंकिणीनांनिनादैर्दैदेशिकानांपृच्छतीवो ३२

त्प्रेक्षते किंस्वचिद्वापिरम्यासिराममीदृगनगरंदृष्टं समस्ततिर्य्यपूरगुणयुक्त्वाऽत्युत्सुकास्वचीचा पुनः य
त्रपूर्यां श्रीहरिवंशावितसप्रभाश्रीमुनिसुव्रतस्वामिनः चत्वारिकल्याणकानिजातानि तेनेयंनगरीयावत्योपम
यावर्ण्यतेतसर्वेप्युक्रमेवर्त्तेयं तत्रअष्टादशवर्णरक्षको समस्तन्यायवतामग्रणी भुक्तिमोक्षयनिश्रेणिगु
णश्रेणीरीत्रश्रेणिकभूपतिरभवत् यस्यदिग्भागीदृशः कीर्तिप्रतापरूपाभ्यां: श्रीतारुणाभ्यांश्रीखंडकुं
कुमाभ्यांमर्चितास्यांरेजिरे यस्यराज्ञःकृपाणेन समरांगणविषयेगजघटानांछिन्नादंतशकलाः यशो
क्षांकुरोद्गतावइवराजिरे पुनः यस्यराज्ञः अभयकुमाराख्यस्सुपुत्रोमंत्रीपदेस्थापितो मंत्रीपदश्रिया
स्कंधौसोरत्नमिवलब्धंसोभामातनोतिस्म पुनः यस्यराज्ञः मोक्षजंमद्वयसुखंदातुं प्रसृएतादृशंक्षायि
कंसम्यक्त्वं एकांमेनसिद्धगुणाविनावतुल्यवर्त्तते अतोजिनवचनेशंकितादिदोषरहितमिथ्यार्यः पुनः
योराजाप्रत्यहंस्वर्णमयान् अष्टोत्तरशतसंख्यकान् यवान्कारयंस्त्भक्तिभरनिर्भरतोवीरपरमेश्वरस्याग्र
ण्यगत्वा नैरष्टोत्तरशतैर्यवैः स्वस्तिकमापूरयति तदनुभक्तिभरेणस्तुत्वानत्वाचजिनवचनामृतंचापिब
ति यदातुवीरविहारवान्यत्रविहृतोभवति तदातुयस्मिन्दिशिस्वामिनः स्थितिर्भवतितत् सन्मुखंसप्ता
ष्टपदानिगत्वा भावेनवंदनत्रिकंपूर्वं क्रमतिचंद्यस्वर्णमयवैर्यःस्वस्तिकमापूर्य्यनत्वास्तुत्वाचगृहमागत्य
भोजनादिकंकरोति इत्यादिजिनभक्तिप्रभावतो जिननामकर्मबद्धवातेन अनागतचतुर्विंशत्यां श्री

पद्मनालनामा ग्रामस्तिष्ठं करोति निष्पत्ति अथ तस्य राज्ञ तस्मिन्नेव नगरे ऽतिप्रसत्तिपात्रं राज्ञः मगधाधिप
स्य याचकजनानां कल्पमालइव श्रेष्ठी कुसुमपालनाम्ना परिवसति स्म तस्य महद्रम्यं कं जीर्णं सदितत
रुगणं पुष्पफलपत्रछायारहितं उद्यानं समस्ति अथ मार्गश्रमश्रांतः स धन्यः संध्यायां तस्मिन्नेव जीर्ण
उद्याने रात्रौ वासमकार्षीत् अथ तस्मिन्नेव रात्रौ तस्यैक निधिधन्यागमनप्रभावेन जीर्णोद्यानस्थानि शु
ष्ककाष्ठकल्पानि वृक्षाणि वसंतागमे वनानीव समुद्गत पुष्पफलपत्राणी च जातानि हरितं जीर्णप्राय
मपि तदुद्यानं नंदनवनसदृशं जातं अथ प्रभाते संजाते वनपालकेन तथाविधं वनं दृष्ट्वा हर्षितो या
वदनं विलोकयति तावत्तेन कस्मिन् शुचिप्रदेशे स्थितो धन्यः प्रातः कृत्यं नमस्कारगुणनचैत्यवंदनादि
कं कुर्वन् दृष्टः तदा चमत्कृतचित्तो चिंतयति नूनमेष कश्चित् तस्यैक निधिः स्फुरद्वरानुकाररूपसौभा
ग्यस्तत् रात्रौ अत्रोषितः तेनास्य पुण्यप्रभावेन शुष्कं वनं नंदनवनोपमं जातं इति मनसि निर्धार्य सहर्षं
श्रेष्ठिगृहे गत्वा श्रेष्ठिने वर्धापनिकां ददौ स्वामिन् युष्मदीयवाटिकायां कोऽपि तेजस्वी पुरुषः रात्रौ उषितस्त
स्यातुलातुल्यो शुष्कवनं देवरमणोद्यानोपमं जातमस्ति ऽतः वर्धापनं ततो श्रेष्ठि वनपालकोक्तं श्रुत्वा विवि ३४
स्मितचित्तो विलोकनेकरसिको पवनं ययौ तत्र चोद्यानगृहे समासितं धन्यं ददर्श समयचिंत्या ऽकृता ऽ
संगतायसौभाग्यताजनं तास्तुरविग्रहं सर्वसल्लक्षणपूर्णं गुणहृदि रूढा ख्यातसिद्धं धन्यं दृष्ट्वा श्रेष्ठिवि

चिंतयति नूनमस्यानुभावेनैव मम वनं पल्लवितं जायते किमु विनाचंद्रोदयं समुद्रजलोल्लासो भवति इति वि
तांत चिंतयित्वा विचक्षणवरः स श्रेष्ठि अनात्तरेण धन्येन समं मार्गागमनसुखकुशलवार्तां पृच्छति स्म सोमरू
नजनाऽवनंतं सहव्यंमनेन ऊँडरूप ममध्ये निर्जीव प्रायमपीदं वनं वनपल्लवनिर्गमन छलेन हर्षितमिव सपु
ष्परोमरंजातं मम च त्वद्दर्शनामृत सेकेन मननयनेपल्लविते ऽतो ऽस्मदीय सर्वोपचितपुण्यपुंज उदययोगेन
मरुस्थल्यां कल्पवृक्ष इव त्वद्दर्शनलाभं मन्यामहे अतो हे सज्जन शिरोमणे कृपां कृत्वा मम गृहे यावद्दागमनं
प्रयासेन मम मनोरथ पूरणानुग्रहं कुरुष्व च मत्गृहे कृत्वा कुसुमपालश्रेष्ठिना धन्यं स्वगृहं नित्ये माणिक्यं
स्वगुणैरेव जनत्रत्रापि मानपूर्णमर्च्यते अथ चास्यंगोद्वर्तनस्नानादिसामग्रीभिः शरीरसुश्रूषां कृत्वा चंदना
दिना अंगरागं विधाय दिव्यलालापेलवानि वस्त्राणि परिधाप्य सबहुमानं विविधरसवत्या भोजनं कराप्य स्व
र्णविष्टरसंस्थाप्य पंचसौगंधिकं तांबूलं दत्वा विविधैरुपचारैरूपचर्य श्रेष्ठि करांजलिं कृत्वा स विनयं सगौ
रवं धन्यं प्रतीत्युवाच भोभोमम्य अस्तु कृत गुणैः स्तेनव गौरवं शताज्ञानां एव यदुक्तं आचारकुलमाख्याति इ
त्यादि दृष्ट्वेतो मे ममजीवनस्वरूपस्य वनस्य फलकुसुमश्रीदाइ नेवस्ये कुसुमश्रीकन्यां दत्वा किंचनाऽनृणस्य मे छामे
स्ति तस्मात्कारणात् एनां मम तनयां कुसुमश्रियां पाणौ कुरुत्व यथा कादंबिनी धारया कदंबपुष्पमिव म
ममनः पुष्पं प्रस्फुरति इत्येवं श्रेष्ठिवाक्यं धन्योऽपि सत्यास्त्र्यानुरूपां मन्यत तदा श्रेष्ठिनाकुंकुमारुणघोलं

धन्यचरित्र

७५

कृत्वा कुसुमश्रीप्रदानसत्यंकारस्वरूपमखंडमंडलैः सहतिलकं कारयामास तदा श्रेष्ठिनातिबहुमानपू
र्वकं स्वागारे स्थापितोऽपि मानधनेनामुना धन्येनापि संजातस्वस्वरसंबंधे एकत्र च सनं मानहानेः कारणमि
ति हृदि विचार्य धनेन सारकगृहं लात्वाऽन्यत्र स्थितत्वात् यदुक्तं नीतिशास्त्रे मित्रस्याप्यापरस्याऽत्र
समीपे स्थितिमावहन् कलावानपि निःश्रीको जायते लघुताऽस्पदं १ चिंतामणिप्रसादेन यथा यथा व्या
पारधनकीर्त्तिसिद्धिर्वृद्धे तथा तथा लोकैः द्रुमफलेरं मजैरिवाश्रितः अथोद्वाहाऽर्थं गृहीतप्रशस्तमासति
थिनक्षत्रवासराऽऽयाते श्रेष्ठिनाऽनल्पान्यदिने सामग्रीं संयोज्य सूरिमहोत्सवे विवाहं कर्त्तुं प्रवृत्तः धन्ये
नापि स्वगृहयोग्यं कजयार्द्धिकोमहः प्रवर्त्तितः पाणिग्रहणदिवसे श्रेष्ठिनी यथाविधि अनर्घ्यमणिमौ
क्तिकादि दानपूर्वकं कुसुमश्रीकन्या धन्याय दत्वा धन्योऽपि तां गृहीत्वा शिवशिवामिव केशवकमलामि
व स्वस्तुसे कुसुमश्रियासार्द्धं पुण्यप्रतिसात् पंचविषयिकसुखलोभात् भुंजमानोऽसुखेन कालनिर्गमनं क
रोति अथैकदा प्रस्तावे श्रीमद्राजगृहपत्तने चंडप्रद्योतालिघ्नमालवाधिपतिमगधाधिपतिजेतुंमनो विकटकट
कं कृत्वा मगधप्रति चचाल चरैः तां समीपागमनं राज्ञे श्रेणिकनिवेदितं तं चरोक्तं श्रुत्वा असनयमसयं मेद
तः शरैः युद्धविजयसंदेहो प्रधानपुरुषः स्य यः अतः कारणात् तत्र साम स्तुन कर्त्तव्य गर्वोस्तु कात्मा
मनहीयं द्वितीयो दाम तस्याप्यनर्हं उच्चदानेसेव्यसेवकसाव धाउर्सवति लोके दंभो दत्तेति गीयते तदा ७५

स्माकं मानहानिर्जायते अतोऽत्र त्रितीयसाध्यमिदं कार्यमस्ति हे प्रभो वैद्येन रसायनेऽदः यथा वैद्यप्रयुक्तं सु
रसायनं तत्क्षणात् रोगान् नाशयति तथा मया धिया प्रयुक्ते कामितदे सेदोपायरसायने वैरीशत्रोस्तत्क्षणान्नोस
विष्यति पश्य तां सेवकस्य बुद्धिकौशल्यमिति स्फुरखेनस्वीयते नात्यन्तं देवं किमप्यार्त्तिर्न विधेया अथानयेनस्त
द्वैधिकयाविवजोकसेनानिवेशस्तेत्र प्रच्छन्नं दत्त्वा मुख्यराज्ञः प्रदाचासतो यत्र यत्र विष्णु चंडप्रद्योतराज्ञो नांप्रदा
चाशा सविघ्यंति तत्र तत्र स्थाने बहुतरंकमुचीषु खनित्वा स्थापितं एवं सेनापतिमंत्रिसुलटादीनां निवासस्था
नेषु यथाऽर्हं समीपगृहं न्यस्तं पुनः धूलादितिरस्तु पाजक्षितं कृत्वा रक्षितम् अथानुक्रमेण चंडप्रद्योतराज्ञ
सैनिकैः सैन्यं समीपं चाग्यं बृस्थानं मैनिकैरिव राजगृहं पुरं सर्वतः परिवेष्ट्य समुत्तीर्णं नगरासन्नं सैन्यं निरक्ष्य
दृष्ट्वा पौराः दैन्यतां च मापन्ना भीनराज्ञो स्थितेऽगनिश्वरे इव तत्सुरं प्रलयकालशंकामानत्वानास्थिताः अथ
सर्वोपाय प्रवीणबुद्धिसंसारसारस्यनंदनोऽसयदंतात् चंडप्रद्योतस्तुपायगुसंलेखं प्रास्थापयदिति
स्वस्ति श्रीमद्राजगृहनगरात् यथास्थानस्थितान् पूज्यपादान् प्रतिमैव कोऽभय विज्ञप्तिपत्रं प्रास्टति कु
सत्ते प्रत्यहं स्तुसचिंतकस्य सेवकस्य प्रणतिस्तेया परं श्रोका विज्ञप्तिः सोपयोगं वाच्या तद्यथा हे पूज्याऽस्माकं
शिवादेवी चिल्लणा च तुल्यमानपूज्यास्ति अतो मे हितं श्रृणु त्वं सेदोपायवेदिना मत्यित्रासचेऽपि त्वं नृपाले दि
तास्ति अर्वाक् दिने तेऽस्मो मत्पोतास्वर्णदीनारनिधिंदत्तवान् त्वां धर्त्तुमास्मात्कर्त्तु मेषउद्यमकृतो वर्त्तते

अतो तेन नृपाय स्वसैन्यस्य च बद्ध्वा त्वां मत्वीउः समर्प्ययिष्यंति धनेऽत्रेते नृपाय त्वां तर्प्ययिष्यंतीति श्रुत्वा य
दि मउक्ते प्रतीतिर्नास्ति। तदा ते पटावासेषु दिनाराः निखाताः संति तान् पश्य छिय स्मात् पाणिस्थमणी
कंकणे दर्शिते कस्वमीढोसेति खेखाधीमं च बुध्य त्रिवादेवी प्रियोप्यधि एकस्य राज्ञो निचामं प्रत्ययार्थ
म विखनतत्र तत्र दिनारान् गुप्तकृतान् विलोक्य दीनान् मेति चिंतितवान्। अहोऽ सत्यस्यपमोद्धाहं। यद व
सरे ज्ञापितं यद् यं न ज्ञापयिष्यत्तत् तदा मम का गतिरभविष्यत्। अतोऽत्र कस्याप्यरेकष्टनं न युक्तं स
र्वथैवेति स्वामिद्रोहका जाता तेनास्मात् पलायनमेव युक्तमिति विचिंत्य स्वमेव पलायितः। तं पलायमा
नं ज्ञात्वा मनसि संदेहं दधाना सर्वेऽपि पलायितुं लग्नाः। चरैस्तं व्यतिकरं ज्ञात्वाऽभयोऽश्रेणिकाय निवेदि
तवान्। सोऽतातातघास्य यच्छ्रेष्ठं बहस्ति घोटकादिकं गृहाण। ततो श्रेणिकोऽपि नरपतः तस्य हस्त्यश्वाद्यादद्
परंपरया देशेषु वार्त्ता प्रवर्त्तिता चंडप्रद्योतो नष्टः श्रीश्रेणिकस्य पतिना सर्वस्वं लुंटितं। अथ प्रद्योत
स्तं गत्वा न इष्टसन् स्वां पुरिमविशत् अपरे च नृपाः कष्टतः दृष्टतः प्रापुः चंडप्रद्योतनं प्रतिचेवमालप
न् स्वामिन् किमत किं तं पलायनं कारणं कोवा भयोत्पन्नो येनाऽऽशु पुरानुकारि सैन्यविस्तरे सत्यपि रूद्ध
वत्पलायनं कृतं भवद्भिः। सैनिक्रूरदैरेव भुक्तेऽसति प्रद्योतस्याह ये रक्षकास्ते च भक्षकाः जाताः तदा
किं क्रियते सैन्या नृपैरुक्तं जगदेकसरणानां भवतां कोऽलक्षकरिदंत्वसंसाम्यवचनं भवदुक्तमर्पणेन ३६

तं न भवति। राजाप्राह युष्मयमे च विश्वासघातका कथं धनलोभेन स्वामिद्रोहं कर्तुं लग्नाः परं तु मम सुहृदे
नस्वधीनाऽभयेन ज्ञापितं निस्तुच्छिमत्या कृता। यदुक्तं पंडितोऽपि वरं शत्रुर्मा मूर्खो हितकारक इत्यादि स
र्वं व्यतिकरं धननिर्णयार्थं दृष्टौ खननप्रत्यया जात सेनात्त किं तपलायनं कृतं तेन स्वाहं जीवितो उरितः प
रं तु युष्माद्दशं पंचत्रीयकुलोद्भवानां उत्तमानां इदृशं स्वामीद्रोहकरणं न युक्तं इत्येवं राज्ञोक्तं न सम्यत्ते नृपा इत्थ
हि हस्याक्तं चंतः स्वामिन् इयमा सेयिमाया भवतानताता हृष्टाराभस्येनात्रागमनेन युष्माकमस्माकं च
मानहानिर्जाता गतं च मानं वर्षशतैरपि नागच्छति वयं तु प्राणांते पि न विश्वासघातवा नामि पि कुर्मः
यदुक्तं चः मित्रद्रोही कृतघ्नश्च स्वामिद्रोही पुनःपुनः विश्वासघातकाश्चैते सर्वे नरकगामिनः १
इत्युक्ताशपथशतैस्तैः नृपः प्रत्यायितो रूपोपितांदंतरचनां भत्वा बऊतरशोचति परम चसर
स्वेष्टपुनः स्थानं नाप्नोति एवं श्रासत्यं काउनिर्गमनं कुर्वे नामन्यदास तांतस्थि तोप्रद्योत प्राह कीदृशी हसता
यामि दृशोऽस्तियोऽभयं बद्ध्वाऽऽनयति इति वारश्च त्वानुष्टीति रूपतिसणितं श्रुत्वा सर्वा गर्वा वेश्या वि व
र्जितासमेति अस्माकिंहृ स्वामिन् येनेतयप्रस्त छेदनं कः दक्ष्वश्रीः समीहां करोति ऐरावण रदोत्पाटने
को वाक्षेपवान् भवति को वाशेषशेषशास्थितो मणिग्रहणाय यत्नवान् भवति कः केसरिकेशरां क न्नि
तमिह सहेत्स्यते शास्त्रनिधौ तनि प्रतिमप्रतिभा चतुर्दशय निधिमभयं कः अचेतनाग्रही लिय हितमि

धनावरित्र

७७

छति न कोपीत्यर्थः तस्मिन्नवसरे काचित् गणिकाऽवसरं लब्ध्वा राज्ञः हृद्गतं वचनं प्राह हे श्रीनाथ
एतत्कार्यं मम आदिश यथाहं तमभयं बद्ध्वा स्वचरणाग्रे ढौकयामि राज्ञोक्तं एवं चेत्त्वं हि स्वसमीहित
सिद्धिं कुरु ततः सा वेश्या राजादेशं लब्ध्वा मनसि विचिंतितं बासमतिकलासिक्तो बहुशास्त्रपरिकर्मि
तमस्ति सर्वावसरसावधानो सर्वकार्येषूत्पन्नबुद्धि केनोपायेन वंच्यते एक एव धार्मिकबुद्धिप्रपंचेन वं
च्यते यतो महतामपि धर्मक्रियायां बुद्धिव्यापारणं न भवति किं तु सरलत्वेन मुख्या भवति अतो धर्मदंभब
लेन वंचयामि पुरापि धर्मछलेनानेके वंचिताः श्रूयंते अहमपि धर्मशिक्षां लब्ध्वा वंचयामि एवं परिभाव्य साध्व्या
श्रयेगत्वा वंदनां विधाय धर्मं शृणोति प्रवर्तिनीविचक्षणत्वात् स्तोकैरेव दिवसैर्दृढधर्मविज्ञा जाता ततो राजा
ज्ञया मायामहानिधिः उपासिकावेषा एषा पणांगना राजगृहपुरं ययौ पुराद्बहिःशाखापुरे उत्तारकं
कृत्वा प्रशस्तदीपधूपाक्षतचंदनकाश्मीरघनसारादिपूजाद्रव्याणि गृहीत्वा सपरिकरा पुरांतश्चैत्यपरिपाट्या
चैत्यवंदनां करोति क्रमेण राजकारितजिनमंदिरेऽगमत् श्रीजिनमंदिरद्वारप्रवेशादि अवसरे निसिहि
प्रमुखदशत्रिकादिसत्यापयंति सा पणांगना चैत्याने श्वेतवंदनं करोति तावत्तत्राऽभयोपि जिनवंदनार्थम
गात् अथ तत्र वैराग्यहावभावादिकपूर्वकं जिनस्तुतिं कुर्वंतीं तां दृष्ट्वा प्रीत्या तां स्तुतिं शृणोति स्म श्रु
त्वा चाभयो विचिंतयति कोपि आमंतरात् दियं जिनमतवासितांतःकरणा सक्ति निस्तरिसारितांगाश्री ७७

यधर्मा सांप्रतमागता दृश्यंते अस्याश्चवर्णयात्र सहस्राख्यां बहुमानकरणे महान् लाभो जायते इयं चोत्तमा सा
धर्मिकीति निर्णीय चैत्याद्बहिर्मंडपे निर्गमनं कुर्वंती बालापिता भगिनी कुतः समागमनं भवतीनां भवति इति श्रुत्वा
दंभस्वनयात्तया प्रोक्तं हे धर्मबंधो लोकोदरपुरे भवत्समवतष्यधे मनुजगतिपाटके संसारिजीवज्ञातियाऽहं
क्षेत्रस्पर्शनयाऽत्रानिताऽहमिति पुनरभयो प्राह भगिनी श्रीजिनमतवासितांतःकरणा नाम्नि दृश्ये एव वस्तुस्थि
त्या परिभाषा भवति मया तु त्वदीयजिनस्तुतिश्रवणमात्रेण परिक्षिता तीव्रश्रद्धायुक्तोयं श्राविका परत्वं द्व्य
वहारनयरीपापृच्छामि कस्मात् आगमनं संजातमित्यभयेनोक्ते पुनः प्रादं भविलसितं प्रादुष्करोति हे धर्मबं
धो पृथ्वीरक्षणनाम्नि पुरे सुलड श्रेष्ठिनः पुत्री बाल्ये पिपासार्श्ववर्त्तिनी महत्तरायाः प्रसंगतरं दृढमेरु चिप्रवर्त्ति
श्रुजाता क्रमेण यौवनं प्राप्ता तदा मस्मित्रा वसुदत्तव्यवहारिपुत्रेण सह विवाहो कृतः परिणिता च तेन सह वि
षमिश्रितया यनुत्त्यानि वैषयिकसुखानि भुक्तानि एवं कियत्यपि गते काले पूर्वकृतभोगांतरायोदयात् भर्त्त
मृते तद्वियोगदुःखेन दुःखिताहं कापि रतिं न लभामि तदा जगन्मातृतुल्याऽर्यमहत्तरया प्रतिबोधिता वत्से
किं विषादं करोषि एषः नरभवोऽतीवदुर्लभस्तत्रापि प्राप्तं सत्त्व विषयकदर्थनया कियान् निष्फलो गमितोऽधु
ना तु विषयघ्नीगमनतुल्यं सर्वमरणं कामकदर्थनकारणं मत्त्वा त्वं जिनमार्गज्ञात्वा किं विषादकरणं युक्तं
चित्तस्थिरं कृत्वा धर्मप्रवृत्तिं कुरु येनातिदुर्लभतरप्राप्तामनुजभवसामग्रीसफला भवति अ

नादिशात्रवप्रमादान् विमुंच्य धर्मं करोति कुरुष्वेति प्रवर्त्तिन्योपदेशेन सत्त्वमरणशोकौ मुक्त्वा धर्मार्थिनी जातास्मि
तदनुरेकदा देशनायां तीर्थयात्राफलं श्रुत्वा पौत्रादीनाग्रहं श्रीसिद्धाचलादितीर्थवंदनं कुर्वती काशिदेशमा
मागता तत्र श्रीपार्श्वसुपार्श्वाभिधयोर्जिनयोः कल्याणकभूमीस्पर्शनं कृतं ततोऽग्रे प्रचलंती श्रीमच्चंद्रप्र
प्रभप्रभोश्चंद्रवत्यां वंदितः तत्र च श्रुतं सांप्रतं राजगृहपुरवरे यादृग्धर्मोन्नतिर्विद्यते तादृग्कापि नास्ति यत्र
परमार्हतो श्रीश्रेणिकराजा श्रुतमार्गन्यायमार्गरीत्या राज्यं पालयति तस्य पुत्रो सकलगुणवतामग्रणीसमस्त
बुद्धिप्रपंचैकनिधिः श्रीमज्जिनागमानुसारीप्रवृत्तिकुसलो नित्यं धर्ममारकरुणापुण्यार्थं अमारिपटह
घोषणातत्परो समस्तजीवाजीवादितत्त्वज्ञो बहुजीवानामजीविकादिभयहरणात् यथार्थनामाऽभयकु
मार सचिवोपरमश्रद्धया धर्ममाराधयति इत्यादि यशःप्रशस्तिं श्रुत्वा तद्दर्शनाय चोत्कंठितं तद्दर्शनाग्रो
द्येन मनोरथपूर्त्तिर्जाता परं या दृशं श्रुतं ततोप्यधिकतरं दृष्टं मत्त धन्यायूयं कृतार्था यूयं श्रीमज्जिनेश्वरमा
र्गाराधका युष्मेव दृष्टा किं बहुजल्पनेनकात्रिमो ह्राचनं स्यात् सवत्स दृशे श्रीमज्जैनशासनं प्रोदीप्यतेऽस्मा
स्माकं सवदर्शनोक्तजन्मजीवितं च फलवत् समन्यामहे हे धर्मबंधो त्वं चिरं राज्यं धर्मं च पालय वर्त्तमानसव
इत्युक्त्वा विरतायां वृद्धिकायां धर्मोन्नतिप्रसंसाश्रवणतोषितहृदयोऽभयतां प्रत्युवाच हे धर्मभगनी त्वमद्य ३८
मम गृहे भोजनं चांगीकुरु यथा मम गृहं गार्हस्थ्यं च सफलं भवतीति निमंत्रिते सा दंभिनी जगौ हे धर्मबंधो

ऽद्य संसारसंबंधरीत्याहम् कस्यापि गृहे भोक्तुं न गच्छामि परं धर्मसंबंधेन साधर्मिकरीत्याऽगच्छामि परं त्वद्य मम श्रीम
न्मुनिसुव्रतस्वामिनः कल्याणकभूमीस्पर्शनं जातं मतोऽद्य तीर्थोपवासितास्ति तेनाग्रेऽन्यदिने तावदिच्छाप्रत्या
त्पूर्वमागमिष्यामि त्वत्किं मद्गृहे नास्ति इत्युक्त्वा स्वोत्तारके गता मंत्रीश्वरोपि सरलस्वभावतया सर्वं सत्यं मन्य
मानो तद्गुणरंजितहृदयो गृहमागतः प्रभाते पुनः सपरिच्छदोऽभयस्तस्या उत्तारके गत्वा सपरिवृद्धां तां निमंत्र्य स्वगृ
हे नीत्वा विविधरसवत्यास बहुमानपूर्वकं भोजनाय भोजनमंडपे उपवेशिता मंत्रियांश्च रसवतीपरि
वेषयति तदा सा दंभिनी पुनः पुनः कल्प्याऽकल्प्य कालातिक्रांतसेलसंसेलादिदूषणानि दृष्टवति तथा तथा
मंत्री तद्परिगुणरागेणरंजितो भवति अथ सा दंभिनी विधिपूर्वकं भोजनं कृत्वोत्थिता मंत्रिणा तांबूलादिकं दी
यमानं नादत्ति धर्मबंधो किं मस्माकं तांबूलस्य सया कारणं तांबूलं तु श्रीजिनाज्ञाऽविरुद्धं जल्पनमेव इत्युक्तो
बूलं उभयात्यकृत्भवति ततो मंत्रिणा विविधभूषणवस्त्रादिना परिधाप्यमाना वैराग्यभावनापूर्वकं यथायो
ग्यं वस्त्राभरणादीनि गृहीत्वा मंत्रिणं स्तुत्वा च स्वस्थानं गत्वा च पुनः दिनद्वयांतरे मंत्रीगृहे गत्वा सा दंभिनी था
ह हे धर्मबंधोऽद्य सगिन्याचा विज्ञप्तिश्चांगीक्रियतां तदाऽभयेनोक्तं उच्यतां सुखेन सगिन्या तयोक्तमद्य
भोजनाय मदुत्तारके नुग्रह कर्त्तव्य यथा मम जन्मजीवितव्यं च सफलं भवति सच्चदागमनेदरिद्रीनां
निधानलाभमिवा स्वगृहे मनोरथतरुसफलो भविष्यति तदाभयकुमारेण धर्मप्रीयनाभयेनोमित्युक्त्वा चि

धन्यचरित्र
४९

मूर्छिता तया चोपचारकेण त्वा यच्चिंतितं तत्कृतं यथाऽवसरेऽसयोस्त्वत्परिज्ञद्दो भोजनायागतः दंसिन्या स्था
दरसावोदर्शितः मंत्रीरपितया दत्तासने उपविष्टः सेवकास्तु बहिर्द्वारांतरे स्थिताः द्रव्यं धर्ममार्गानुयायि वा
र्त्तया मंत्रिरुद्धाहितः ततोऽभ्यंगनस्नानादिपूर्वकं भोजनायउपवेशितः विविधसत्किरसवत्या परिवेष
यंत्यातया कल्पाकल्पविभागधर्ममार्गानुयायि तथा वार्त्ताऽवतारिता या यथाऽसयस्य दंतलेशोपिस्म
तिपथेनायाति भोजनांते दधिप्रतिरूपिकां चंद्रहासमदिराम पिपायितः भोजनाउद्धायं सम्पगासनेनि
वेशयित्वा तांबूलादिदत्वाऽग्रे स्थिता दंसिनीयावता शिष्टाचाररचनया वार्त्तांप्रकाशयति तावता साम
दिराबलेन निद्राऽऽगता मूर्छितश्चैतन्योजातः तदा तया पूर्वं रक्षिताऽपरद्वारे रथे निवेश्य स्वयं चारुह्य सो
ऽरुयनीमार्गं प्रतिचलिता स्थानेऽन्याऽन्यरथप्ररोहणप्रयत्नेनातिस्तोकेनैव दिवसेनोज्जयिनीं प्राप्ता त
दातया मूर्छितस्याऽसयस्य हस्तादिकं बध्वा प्रद्योतनाग्रे ढौकितः तावता तस्या मदिराया मूर्छाप्युत्तीर्णा
अवसरं प्राप्ताऽसयोक्तिः सनितस्ततः पश्यति विचारयतिच: किमिदमदृष्टपूर्वं स्थानं केनानीतोऽह
मितीक्षोपायति यावता प्रद्योतेनोक्तं भोऽसयश्रृणु तव ममउक्तं यथानीतिज्ञोपि अनेकशास्त्रकुशलो
पि वाक्पटुरपि परोपदेशकुशलोपि सप्तर्तिकां पचनपिशुकः ...नागरस्नेते सत्यत्वं तत्त्वमपि
बहुचिज्ञानचिदुरपि देशदेशांतरे बुध्याऽनन्यसदृशः त्वंप्रख्यापयतोपि सर्वसमयोत्पन्नमतिरपिमा ४९

जैरीकल्पाया प्रणंगनयागृहितोसि अतोधिकृते बुद्धिचातुर्याय तवसर्वसमयसावधानत्वं क्वगतं सत्या
ऽसत्यपरीक्षकत्वं क्वगतमिति राज्ञोक्तं श्रुत्वाऽसयेनमनसि निर्णितं नूनमनेन छलं कृत्वा प्रणांगनया धर्म
छलेनाहं मत्रानायित मितिसंप्रधार्यासयोऽब्रवीत् राजन् धर्मछलादयं बंधो मम हिंमां हानिकर्त्तानसवति
किं उप्रत्युतोऽमून्नुद्दीपयति किंवास्माकं देशेकुलेच कोपि धर्मछलेन नेदृशं करोतीसाच क्षत्रीयकुलमर्यादा
पिनास्ति अथाऽस्माकं वरं वर्त्तितं यदनेन कारणेन ममात्र क्षेमप्रत्याः दर्शनं संजातः मद्येच अभीष्टतरो दिवसेति
वचनचातुर्यात् प्रद्योतोपि प्रशांतिभागसंजातः शत्रुगृहेस्थितोप्यसयः स्वकीयकलागुणैः कृत्वा सर्वेषांमहित
स्पोजातः यथाकलावान् चंद्रः शुक्रगृहे स्थितो वृद्धं प्राप्नोति राजसभायांस्थितोऽसयं विविधशास्त्रदेश
विज्ञानाहतरसगर्त्तितावसरोचितवार्त्तया राजानं रंजयति तेनचराज्ञः प्रीतिपात्रमभयोऽजनि क्षण
मपिप्रायस्थैनमुंचति नित्यमसयोक्तिश्रवणार्थमुद्दकर्णैवतिष्टति इतश्चैकस्मिन् दिवसे राजगृहनगरे
स्वमत्तमेघघटाश्च कोमदेनांधिकृतांतः करणोसेचनको नाम करिवरो श्रेणिकस्य महीपतेः गजालानतो
गत्वानमुन्मूल्य पुरश्रीनृपराणि गोपुराणि पदे२ निघ्नत्स्सुखश्रियां देवालान गवाक्षान् स्वपदाघातेर्जीर्णस्तंभ
मिवचूरयन् गृहदेहस्य अक्षानगवाक्षान् श्रृंगादंभघातेन पातयन् संपदामरहानि चारहान्चरणेघ
ट्टयन्तरणेघट्टयन् अयोसारसदृक्षस्य श्रृंखलान् कमलानि वत्रोटयन् मनोरमान् कोमरामान् मोटयन्

जे॰ धम्मसु टान् स्वलील या करेण तत्त्क्तविकर्ण यन् कंडकानिव बालकान्थो भ्रमुञ्चा लयन् आलानगाधासोरे घातयमधि वमृतिं श्रौध न्

सुभिक्षप्रवृत्तेरूटान् इदृशोऽक्रूराकारस्तीक्ष्णो समस्तपुरिप्रलयकालमिलो पुरीभ्रमणं चक्रुः अथ तत्र राजाज्ञया बहुमिरुपायकसाले मंत्रिभिः सदादिश्तिः तन्निग्रहार्थं कृतोपायाः राजयक्ष्माऽसमयेऽखिला वैद्यकृतप्रतिकाराइव विफलत्तामगुः तदा श्रीधनोश्रेणिकस्य पत्ति समस्तबुद्धिसंपदां निधानमवत्तिस्त प्रधानमस्य यं समवीत: इतोचिंतयत्तिस्म नूनमस्मिन् समये यदी अभयो भवति तदामुं करिंक्षणेन वशमानयति अतः लोके क्रिसफला इव पले एकेन विना जगत् शून्यमिवाभाति एवं विचारयति मुदा राजादय यावत्तास्तिष्ठति तावत्ता केनाप्युक्तं महाराज बहुरत्नावसुंधरास्ति अतो पटो घोषणां कारायते तदा कोपि गुणी नाम धणी कार्यं करिष्यति तदा राज्ञा इदृशो पटहो वादितः भो भो: लोकाः श्रूयतां राज्ञादेशो यः कंकोपि कोपि प्रकोपितं करिवरं योगिमनमध्यात्ममिव आलानस्तंभेऽनयेत् तस्मै चक्रजितविधश्रियं सोमश्रियं स्वरूतांदर्दातिपुनः लक्ष्मीसत्ता राममन् सहस्रसंख्याग्रामांश्च अतो यः कोपि कलावान् भवति सः प्रगटी भूत्वा गजमालानस्तंभेनयेत् इत्येवं सकलेपुरे राज्ञा पटहो घोषणा कारिता क्रमेण धन्यगृहाऽस्पर्णमागत धन्येन सा पटहघोषणा गजवशीकरणांगीकारपूर्वकं वारिता तदा सेवकैः पटहवादनं मुक्त्वा राज्ञायेनिवेदितं स्वामिन् केन वैदेशिकमहापुरुषेण पटहोस्पृष्ट राज्ञापितं श्रुत्वा महदाश्चर्यपूर्णहृदयत्त्वागात् धन्योपि यत्र गजो दुःखलत्तां करोति तत्रागत बहुनिवस्त्राणि मुक्त्वा वृक्षक झोटकेन कटिबंध बधमन्तो भूत्वा क्षणं शीर्षप्रदेशे क्षणं पु

MEMORIAL

च्छ: क्षणं पार्श्वे क्षणं पृष्ठप्रदेशे क्षणं वस्त्रगोलकं कृत्वा घातयति गजोपितमाहननायधावति तदा धन्योपि लघुलाघवकलां कृत्वा पृष्ठेगत्वा ताडयति गजस्य चक्रवत् भ्रामयति इत्येवं गजदमनविद्या कुशलेन धन्येनाऽतिव गजो खेदितः गजोपि इतस्ततः परिभ्रमणश्रावन बलात् श्रमखेदेन निर्मदो जातः तदागत्य शार्दूलं गजाव्रत्त्वं गत्वा उत्प्लुत्य गजपृष्ठे चारूरोह पादेन मर्मणि घादत्यां कुशेन च शरचीकृत्यानाकुलमनः आलानस्तंभे निवाबबंध: मगधाधिपोपि तत्कला दृष्ट्वाति रंजित हृदयो जातः धन्यं बहुस्तुत्वा स बहुमानपूर्वकं मनोरमं महोत्सवं कृत्वा तस्मै सुतां सोमश्रियं ददौ सहस्रं च ग्रामान् अन्यानपि सुवर्णमणिमुक्तादीनि करमोचने दत्वा स्ववचनं निर्वाहं करोतिस्म अथ धन्यस्य कीर्त्तिलता शुष्कवनपल्लववनात् उत्तालहस्तिसयनि वारणाच्च समस्तनगरगृहमंडपे विस्तारं प्राप्तानि वा वृद्धं वर्षणात् तत्तत् नंदी वशात्तत्ते इतश्चात्रैव मगधदेशे धनधान्यसमृद्धिमान् इंद्रीयग्रामसमर्दा वीशालियाम इति नामग्रामास्तत्र तत्र कापिलीयप्रणितिवत् प्रकृतिसरलास्वकार्यकारिणी लइकस्वलाबाकापि एका धन्यासि धासवचिराभवत् तस्याघ्रोइदारिद्र संगमसंगमेतिनाम्नातनयो सुमुखो प्रांजलप्रकृतस्यसत् दृढालोकानां गृहकार्याणि खंडनपेषणादीनि करोति पुत्रस्तु तेषां गोरूपाणि वत्सान् चारयति एवं कृत्वा कष्टमपि निर्वाहं करोति अथान्यदा कस्मिं पर्वमहदिवसे गोरूपाणि गृहीत्वा संगमो वनेचारयितुं गता तदा तत्रान्ये पिमिलागता परस्परं वार्त्ता कर्तुं प्रवृत्ताः एकेन बालकेना

न्यस्योक्तं किं त्वयाऽद्य लक्षितं तेनोक्तं क्षैरेयी ऽन्येनापि कथितं मयापि क्षैरेयी अद्य पर्वदिवसे क्षैरेयी केवलमेव
लोकैर्भक्ष्या तच्च तेनाकर्ण्य तत् तदा संगमाय पृष्टं किं त्वया लक्षितं तेनोक्तं रूक्षकसट्टोकुलकादियत् किंचिद्दित्थं श्रु
त्वा निद्रितुं लग्ना अहो ऽद्य पर्वदिवसे ऽहं ईदृशं रसविरसं कदन्नं खाद्यते ऽद्य पायसमेव केचल्लभन्ते ततो भीता
न्नां बालो श्रुत्वा संगमो गृहमागत्य स्थविरां प्रणम्येति याचते हे मातः हितकारिणि ममाद्य सर्वथा घृतपायसम
मेव देहि ततस्तु तस्य वचनं श्रुत्वा स्तनां रोदितिस्म यदेकस्यापि स्वपुत्रस्य पायसमात्रमनोरथमप्यहं नि
स्वा पूरयितुमसमर्था ऽतो मम जन्म जीवितं च धिक् मातरं रुदतीं दृष्ट्वा बालोपि गाढं रुदितुं प्रवृत्तो ऽथ तयोः रु
दनं श्रुत्वा सदयाश्च प्रातिवेश्मिक्य एकत्र मिलित्वा स्थविरां प्रति रुदनकारणं पप्रच्छुः ततः स्थविरा रुदती
त्येवमवदत् हे पुण्यवत्यस्त्रियः एष मम पुत्रः कदापि खानपानादिमनोरथं न करोति यादृशमहं ददामि तादृशमेव भुंक्ते
न कदापि हठं न करोति अद्य तु कस्मिन्नपि गृहे मिलितान् क्षैरेयीभोजनं कुर्वतो दृष्ट्वा मां प्रति पायसभोजनं याचते
अहं तु निस्वा विना द्रव्यं क्षैरेयी कुतो भवति अतो रुदनं करोमीति तस्या दीनवचनानि श्रुत्वा एकया प्रातिवेश्मि
